[illegible]

(४) चतुर्थी कला - (६४) चतुःषष्टि मणि माला ॥
॥ पूर्व पीठिका ॥
(४-१-१) ऋग्वेदसंहिता ॥ वाङ्मयी ॥

१ "ऋग्वेदसंहिता - दाशतयी - दशमण्डलसहिता ऋङ्मन्त्रात्मिका - वाङ्मयी ॥
(दशमण्डलानि - (१) शतर्चिमण्डलम् । (२) गार्त्समदम् । (३) वैश्वामित्रम् । (४) वामदेव्यम् ।
(५) आत्रेयम् । (६) भारद्वाजम् । (७) वासिष्ठम् । (८) प्रागाथम् । (९) पावमान्यम् ॥
(१०) क्षुद्रसूक्तमहासूक्त सञ्ज्ञकम् ॥
(१) मण्डले - सू. सं. १९१, ऋक् सं. २००६ ॥ (२) मं. सू. ४३ । ऋचः - ४२९ ॥ (३) मं. सू. ६२ । ऋ. ६१७ ॥
(४) मं. सू. ५८ । ऋचः - ५८९ ॥ (५) मं. सू. ८७ । ऋ. ७२७ ॥ (६) मं. सू. ७५ । ऋचः - ७६५ ॥
(७) मं. सू. १०४ । ऋ. ८४१ ॥ (८) मं. सू. ९२ । ऋ. १६३६ ॥ (वालखिल्ये. सू. ११ । ऋचः - ८०)
(९) मं. सू. ११४ । ऋचः - ११०८ ॥ (१०) मं. सू. १९१ । ऋचः । १७५४ ॥
सर्वयोगे मं. १० । सू. १०२८ ॥ ऋचः - १०५५२ ॥ इति ॥ (गौतमप्रोक्तः ...)
सोऽयं शाकलसंहिता पाठक्रमः । (बाष्कलशाखा पाठक्रमस्तु अन्यथैव विद्यते ॥
एवमेव सर्वेषां मन्त्राणां "ऋषि - छन्दो - देवताः" अपि ज्ञातव्याः, ताश्च उत्तरत्र
उपाख्याने निर्दिश्यन्ते) शाकल ... (सूक्ताम्)
(सम्प्रति ऋग्वेदस्य पाठप्रवचनयोः "अष्टकम् - अध्यायः - वर्गः" इति अन्यः क्रमः
प्रवर्तते, अष्टौ अष्टकानि प्रत्येकस्मिन् अष्टके अष्टौ अध्यायाः" सर्वेषां योगे ६४ अध्यायाः
प्रथमाष्टकस्य सूक्तानि - (१२१) - वर्गाः (२६५) ऋचः - (१३७०) (२ अष्टके - सू. (११९)
वर्गाः (२२१) ऋचः (११४७) (३ अष्टके, सू. (१२२) वर्गाः (२२५) ऋचः (१२०९)
~~ऋ.~~ ४ अष्टके । सू. (१४०) वर्गाः (२५०) ऋचः (१२८९) (५ अष्टके । सू. (१२९) वर्गाः (२३८)
ऋचः (१२६३) (६ अष्टके । सू. (१२४) वर्गाः (३१३) ऋचः (१६५०) (७ अष्टके सू. (११६)
वर्गाः (२४८) ऋचः (१२६३) (८ - अष्टके - सू. (१४६) वर्गाः (२४६) ऋचः (१२८१)
(ऋग्वेदे ब्रह्मवादिन्यः मन्त्रदर्शिन्यः स्त्रियः)

आदौ वेदविद्या ~~प्राण~~ प्रतिष्ठा प्रकरणे वेदस्य सप्त नामानि निर्दिष्टानि, तेषु
"छन्दः इति (तृतीयं वेदस्य) ~~चतुर्थं~~ नामधेयम् ॥ तथा प्रथमकलायां - "वेददर्शनम्" इति पञ्चमं
प्रकरणं दर्शितम् । तेन "छन्दोदर्शनम्" गृहीतं युक्ततरमिति प्रतीयते ।
तच्च "छन्दोदर्शनम्" एकर्षिदृष्टं "दैवरातार्षम्" तस्मिन् अष्टौ अनुवाकाः
सन्ति । (५०) पञ्चाशत् सूक्तानि । (४५०) मन्त्राश्च सन्ति ॥
"असौ मित्रो दिवस्पतिः" इति प्रारब्धम् । गायत्री - अनुष्टुप् - त्रिष्टुप् - जगती "इति
एतानि चत्वार्येव छन्दांसि सन्ति ॥ सविता, अग्निः, वाक्, ब्रह्मणस्पतिः, इन्द्रः,
आत्मा, पुरुषः, आपः, गौः पञ्चगव्यम् - अग्नीषोमौ, इन्द्राग्नी, अदितिः रुद्रः,
भाववृत्तम् इत्याद्याः देवताः संस्तुताः ॥ तस्य छन्दोदर्शनस्य वासिष्ठ मन्वय -
भाष्यं विद्यते गणपतिमुनिना विरचितम् । तस्य आंग्लभाषानुवादोऽपि विद्यते

ऋषिकाणां

+ ऋग्वेदे ब्रह्मवादिन्यः - तासां स्त्रीणां मन्त्रदर्शनानि विद्यन्ते-
ब्रह्मवादिन्यः (२९) सूक्तानि (२५) ऋचः - (२२४)

१ औपनिषदी ऋषिका - मेधादेवी देवतात्मिका यजूंषि (३१)
२ औपनिषद्यः ब्रह्मवादिन्यः " उमा हैमवती, सुलभा मैत्रेयी, गार्गी वाचक्नवी)
=
४ - औप. ब्रह्मवादिन्यः

॥ अथ ऋग्वेदीयो बाष्कलसंहिता क्रमः ॥

गौतमाद्यौशिजः कुत्सः परुच्छेपादिर्दैवः परः ।
कुत्सादिर्दीर्घतमा इत्येवं बाष्कलकः क्रमः ।

ऋषयः	प्रारम्भः	॥ अन्ताः ॥	॥ ऋषयः
१ मधुच्छन्दाः वै०	अग्निमीळे १।१।१	श्रुष्टिमन्तम् १।९३।१२	गोतमो राहू.
२ कक्षीवान् औशिजः	नासत्याभ्यां १।११६।१	तुभ्यमश्वा १।१२६।११	परुच्छेपो दैवो.
३- कुत्सः आं०	इमं स्तोमं – १।९४।१	उत यो अग्ने १।११५।६	कुत्सः-
४- दीर्घतमाः औ-	वेदिषदे १।१४०।१	हरिश्रियम् ८।५०।१०	पुष्टिगुः काण्व
५ भर्गः प्रागाथः	अग्न आयाहि अग्निभिः ८।६०।१	सोमस्य मित्रये ८।६९।१२	विन्दुः आं-
६- पुष्टिगुः- काण्वः	यथा मनौ ८।५१।१	सं ते ८।५१।५	कुशः कां-
७ तिरश्चीरांगि०	आ त्वा गिरो ८।९५।१	विश्वतनके ८।९५।९	मूर्धन्वान् आं-
८ मेध्यः काण्वः	प्रकृतान्यृजीषिणः ८।५८।२	स वै न– ८।५८।२	मेध्यः काण्वः-
९ मेध्यः कां-	यमृत्विजो– ८।५८।१	संवितः ८।५८।१)	मेध्यः का
१० मूर्धन्वानांगिरसः	पावकवत् १०।८८।१९	सुसहासति १०।१९१।४,	(संवननः आंगि

समानस्य – चतुरवस्पमा १५ ऋचः (परिशिष्टं – ३६)

इति ऋग्वेदीया बाष्कलसंहिता।

(१) (॥ सत्यधर्मा सविता)

त्रिपञ्चाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ॥
उग्रस्य चिन्मन्यवे नायमन्ते राजाचिदेभ्यो नम इत्कृणोति ॥
ऋषिः (कवषः ऐलूषः। (ऋ.मं. १०।३४।८)

२
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे वसूनाम् ॥
(सत्यधर्माणम् - अग्निम्)

३ कविमग्निमुपस्तुहि सत्यधर्माणमध्वरे। देवममीवचातनम् ॥
(मेधातिथिः । ऋ.मं.१।१२।७)
(सत्यधर्माणः - देवाः ॥)

४ ऋतधीतय आगत सत्यधर्माणो अध्वरम्। अग्नेः पिबत जिह्वया ॥
स्वस्ति-आत्रेयः (~~आत्रिः~~ ॥ — (ऋ.मं.५।५१।२)
(ऋतस्यगोपौ - सत्यधर्माणौ - मित्रावरुणौ)

५ ऋतस्य गोपा वधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि ॥
यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत् पिन्वते पयः ॥
~~स्वस्ति आत्रेयः~~ (~~आत्रि~~) — ५।६३।१) अर्चनानाः आत्रेयः

६ हिरण्मयेन पात्रेण सत्यस्यापि हितं मुखम् ॥ (ई.उ. १५)
तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ शु.य.सं.अ.४०।१२)
(छन्दोदर्शनम्) देवरातो वैश्वामित्रः ॥

१- त्वं मे माता पृथिवी द्यौरुतासि त्वं मे पिता सविता सत्यधर्मा ॥
(सत्यधर्मा ब्रह्मणस्पतिः) (छं.द. १।३।२ अनु. सू. मं.)

२ ब्रह्मणस्पतेर्यद् कर्तुमग्रियं सत्यधर्मन् विश्वस्मै सर्वतातये ॥
तद् विश्वेषाममृतानां दिवस्परि जीवातवे सं मधुनो ऽमृतं भुवत् ॥
(छं.द. ३।१।५)

(चतुर्थी कला)

(४-१-२) ऋग्वेदसंहिता- (वस्तुतत्त्वविज्ञानम्) (२)

२ ऋग्वेदे - वस्तुविज्ञानम्- तेषामेव वेदमन्त्राणां देवतादिवस्तुस्वरूपज्ञानम्. तथा
तेषां विशिष्ट तत्त्वार्थसंशोधनम्, तद्यथा त्रयाणां भुवनानां अग्निवायुसूर्याः देवताः
तेषां तत्त्वत्रययोगेन सत्स्वरूपज्ञानं सम्पादनीयमिति सर्वशास्त्रसिद्धान्तः॥
अर्थज्ञानं विना केवलेन शब्देन न किञ्चिदपि प्रयोजनं भवितुमर्हतीति॥
तदेव किञ्चिद्विमृश्यते- "यावद् ब्रह्म विष्ठितं तावती वाक्" इति- वाचक-वाच्यरूपयोः
वागर्थरूपयोस्तादात्म्यं वस्तुसिद्धम्. तच्च- वाग् ब्रह्मणोः समानमेवेति निर्णीतम्-
तत्रापि अस्ति किञ्चिद् रहस्यम्- "वाग् ब्रह्मणोरन्योऽन्य प्रादुर्भाव सत्त्वम्"
तथा च अनुश्रूयते- "यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात् सम्बभूव।
स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्॥ इति॥ (तै. शिक्षोप.)
यः विश्वरूपः इन्द्रः स्वयं छन्दसां वर्षकः अधिष्ठाता च सन्- स्वोद्भूतेभ्यः तेभ्य एव छन्दोभ्यः
तेषां छन्दसां अमृतरसात् प्रादुर्बभूव. स इन्द्रः मेधया ज्ञानशक्त्या मां स्पर्शयतु. अहमपि तस्य
अमृतस्य धारकः भूयासमिति भावः॥
एवमेव अन्योऽन्यजन्मसत्त्वं - अदिति दक्षयोरपि अनुश्रूयते" अदितेर्दक्षो अजायत
दक्षाद्वदितिः परि" इति॥ (ऋक् मं. १०।७२।४) तस्येदं यास्कनिरुक्तम् "अपि वा -
अन्योऽन्यजन्मानौ स्यातां देवधर्मेण" इति तयोः अदितिदक्षयोरन्योऽन्यजन्म उक्तम्
सा च अदितिर्दाक्षायणी प्रथिता "दक्षश्च आदित्यः" दक्ष आदित्यो भवति॥ निरुक्तम्.
तदेतदेव तत्त्वं वेदवाक्-पुरुषयोरपि समानम्" तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे"
इति परमपुरुषस्य यज्ञरूपात् तपसः ऋगादीनां प्रादुर्भावः प्रसिद्धः॥
तथा तेभ्य एव वेदेभ्यः परमपुरुषस्य तस्य परोक्षसिद्धस्य विश्वरूपेण प्रादुर्भावः अभिमतः
शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्। अत एव च नित्यत्वमिति।
ब्रह्मसूत्रे शब्दाधिकरणे निर्णीतम्।
"एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा" इति- (ऋ. मं. ९।६२।१)
तस्येदं ब्राह्मणानुवचनम् "एते इति वै प्रजापतिर्देवानसृजत, ~~तिरः पवित्रमिति ग्रहान्~~
असृग्रमिति मनुष्यान्, इन्दव इति ~~सोमान्~~ पितॄन्। तिरः पवित्रमिति ग्रहान्। आशवः ~~इत्यश्वान्~~ इति स्तोत्रम्।
विश्वानीति ~~पशून्~~ शस्त्रम्। अभि सौभगायेत्यन्याः प्रजाः ॥ इति। ब्राह्म. शाङ्खायनम् ॥ (१।३।२८)
तत्र तदानीं प्रजापतिः स पुरुषः देवादीन् ससर्ज, तेन स्वयमपि तेन तेन रूपेण प्रादुर्भूतः
विश्वरूपो बभूव इति सम्पद्यते" तत्रायं ऋङ्मन्त्रवर्णः गर्गर्षेयः प्रसिद्धः॥
"रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते
युक्ता ह्यस्य हरयः शता दश" इति॥ (ऋक् मं. ६।४७।१८) (बृ. उ. उपाख्यानम्)
स एव इन्द्रः विश्वरूपः संस्तुतः॥ "यश्छन्दसामृषभो विश्वरूपः" इति॥
+ स एवेन्द्रः परं ब्रह्मेति - तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः इति

(४) पञ्चमं पटलम्- (चतुर्थीकला ४ तृतीयं पुरम् (३)

(२) अथ छन्दोदर्शने वाग् वस्तु तत्त्वविज्ञानम् ॥

"ऋग्वेदः" अग्निमीळे पुरोहितम्" इति अग्नि देवतामुखेन गायत्री मन्त्रप्रमुखेन प्रारब्धः
"छन्दोदर्शनं तु" "असौ मित्रो दिवस्पतिः" इति. तत्सवितुस्तुरीयं" इतीच सवितृ-
देवतामुखेन गायत्री मन्त्रपरेण प्रारब्धम्, इति विवेकः ॥
वस्तुतः सवितृ देवताकेन "तत्सवितुर्वरेण्यम्" इति मन्त्रेणैव सर्वेष्वपि वेदेषु
पाठ प्रवचनादिकं प्रारभ्यते, तथैव ब्रह्मयज्ञादौ विहितमस्ति वेदवचनेन ॥
" (तै. आ.) तथैव इदानीमपि सर्वत्राप्यनुष्ठीयते,
एवमेव तथैव शुक्लयजुर्वेदे तथा सामवेदेच सामगायनादौ "तत्सवितुर्वरेण्यम्"
इति मन्त्रेणैव वेदपाठः प्रारभ्यते, इति विशेषः, "गायत्रं प्रथमं गानम्" इति तद्वचनम्,
अस्मिन् छन्दोदर्शने प्रथमः त्रिदेवअनुवाकः, तत्र भुवनत्रयाधिष्ठिताः,
सविता अग्निः इन्द्रश्च संस्तुताः, द्वितीयः सारस्वतोऽनुवाकः, तृतीयः ब्रह्मणस्पत्योऽनु-
चतुर्थः ऐन्द्रोऽनुवाकः, पञ्चमः आत्मदैवत्यः, षष्ठः पुरुष दैवत्यः, सप्तमः अब्दैवत्यः
अष्टमः वैश्वदेव दैवत्यः, इत्यष्टाना मनुवाकानां देवताः ।
तत्रापि द्वितीये सारस्वतानुवाके - वाचः ब्रह्मणस्पतेश्च तादात्म्ययोगसिद्धं
मिथुनत्वम् । अन्योऽन्य प्रादुर्भाव तत्त्वादिकं ओतप्रोतं उपादिष्टमस्ति ।
~~तथा~~ " तथाच वाग् देवताकः ऋङ्मन्त्रवर्णः -
॥ सरस्वति त्वं सती ब्रह्म साक्षात् परमन्तर्हितं ब्रह्म प्रज्ञानं त्वयि ॥
आविरभूत् तद् वाचो विश्वया ब्रह्म- वाग् विदा माता विश्वस्य ब्रह्मणो योनिः
छन्दोद. अनु २।४।४) एवमेतादृशं तत्त्वं वाग् ब्रह्मणोः सामरस्येन तादात्म्यच
सिद्धं समर्थितं संस्तुत मनुश्रूयते ॥
तथैव पुनः- ब्रह्मणस्पते वाचश्च तत्समानमेव तत्त्वमुपदिष्टं दृश्यते,
" ब्रह्मणस्पते त्वंच वाक्च संहितौ नेमसमात्मानौ स्थो विश्वयाऽऽत्मना ॥
वाग् विदा ब्रह्मणस्पति वन्द्यो वाचस्पतिः सन् परमः शचीपतिः ॥ (छं- अनु ३।६।३)

एवमेव वाचः पुरुषस्य- आत्मनः इन्द्रस्य, तथा अदितेश्च अपात् तत्त्वम्
चतुष्पात्त्वंच समुपदिष्टं श्रूयते. तदेतदपि वेदविज्ञाने अनुसन्धेयं सदा
अनुध्येयमिति निवेद्यते इति सङ्क्षेपः, इतोऽपि विशिष्टं तत्त्वं
उत्तरत्र- उपसाख्याने- समर्थ्यते.

(५) पञ्चमं पदम्

चतुर्थीकला

चतुर्थं पदम् (४)

((४+२-१))

अपि च अस्मिन् छन्दोदर्शने स्वतः सिद्धं वेदप्रामाण्यम् वेदरूपत्वं च,
गायत्र्यादि वैदिकछन्दोनिबन्धनकॢप्तत्वात्, तथा च वासिष्ठार्षेयः ऋङ्मन्त्रवर्णः,
" ये च पूर्वे ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः। अस्मे ते सन्तु
सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः॥" इति "(ऋक्.मं. ७।२२।९ ।
हे इन्द्र! ये च पूर्वे प्राञ्चः ऋषयः ये च नूत्नाः नूतना ऋषयः विप्राः ज्ञानिनः
ब्रह्माणि मन्त्ररूपाणि ब्रह्मरूपान् मन्त्रान् जनयन्त आविरकुर्वन्, ते तव सख्या
मित्ररूपाणि तानि ब्रह्माणि अस्मे-अस्मासु शिवानि मङ्गलानि सन्तु "इति"
इदमेव अन्वयभाष्यकृता वासिष्ठेन गणपतिमुनिनाऽपि निर्णीतम्, समर्थितं च
भूमिकायाम्॥ अन्ते उपसंहारश्लोकेषु च तदेव स्पष्टीकृतम्॥
"आर्षेण चक्षुषा पश्यद् या ऋच्च स्ताप आचरन्। वैश्वामित्रो देवरातो विश्वामित्र
इवापरः॥१॥ ताः इमा अति गम्भीराः शुद्धाः परमपावनीः। वासिष्ठोऽन्वयभाष्येण
सफलं कृतवान् मुनिः॥२॥ य इदं मन्वते धीराः नवीनं मन्त्रदर्शनम् गम्भीरं
देवरातस्य ~~[illegible]~~ तेषां नश्यन्ति संशयाः॥ इति॥

(विनोबा भावे प्रभृतयः)

अत एव केचित् इदं छन्दोदर्शनम्-नवीनो ऋग्वेद इति वदन्ति, केचित्तु-
ऋग्वेदे एकादशतमं मण्डलमिति ब्रुवन्ति॥ इदमेव विशेषः
तदिदं नूतनाः पाश्चात्याः - पण्डिताः "डॉ वर्णिन प्रभृतयः अभिनन्दन्ते॥"

(४)

(४-३-१) कृष्णयजुर्वेदीया तैत्तिरीयसंहिता ॥ वाङ्मयी(७)

३ (१) कृष्णयजुर्वेदे तैत्तिरीयसंहिता- तत्र अष्टकापरनामानि सप्त काण्डानि सन्ति।
तानि तु नैव अष्टकनामयोग्यानि, अष्टानां अध्यायानां अभावात्। ऋग्वेदादनुकृतानि
नापि काण्डनामार्हाणि, काण्डलक्षणाभावात्। बौधायनादिदर्शितकाण्डानुकरणेन
गृहीतत्वात् इति विशेषः, तथा अध्यायाः प्रश्नाश्च भवन्ति ऋग्वेदात्-
बौधायनसूत्राच्च अनुकृताः, नापि तल्लक्षणयुक्ताः सन्ति॥ इति वैचित्र्यम्॥
अनुवाकाः मन्त्राश्च सन्ति याजुषलक्षणयुक्ताः॥
तथाच तदनुवचनात् "इषे त्वोर्जे त्वा" इति प्रथमे प्रश्ने १४ अनुवाकाः विद्यन्ते,
तेषु १३ अनुवाकाः यजुर्मन्त्रयुक्ताः चतुर्दशः एक एवानुवाकस्तु ऋङ्मन्त्रात्मकः
याज्या-पुरोऽनुवाक्योपयोगिकाः, होतृकर्मोपयुक्ताः॥ एवमेव
ग्रयाणां प्रश्नानां अन्तिमानुवाकाः ऋग्रूपा एव भवन्ति, वस्तुतः याज्या इति प्रसिद्धः
समग्रोऽपि प्रश्नः ऋग्रूप एवास्ति॥ प्रायः बहुषु प्रश्नेषु उत्तरत्र याज्याख्यः अन्योऽनुवाकः ऋग्रूप एवास्ति
अस्यां संहितायां मध्ये मध्ये केचिद् भागाः ब्राह्मणरूपा भवन्ति, ते तु गद्यात्मकाः अपि
स्वरसहिता एव पाठप्रवचनयोः पठ्यन्ते,
(१) "इषे त्वा" प्रश्ने १४ अनुवाकाः, (२) आप उन्दन्तु जीवसे- इत्यत्र १४ अनु॰ (३) देवस्य त्वा-
अभ्रिरसि इति प्रश्नेऽपि १४ अनुवाकाः॥ इत्यादि सङ्क्षेपः
अत्र संहितायां पठितानां ब्राह्मणवाक्यानामपि पदक्रमजटापाठादि-घनपाठान्तं सर्वेऽपि
प्रकृतिविकृतिपाठाः विद्यन्ते, पाठप्रवचनयोः प्रवृत्ताः॥ इत्येवात्र विशेषो दृश्यते।
(२) मैत्रायणी संहितायां संहितायां ~~मन्त्रैः~~ सहैव तत्तद्ब्राह्मणभागस्यापि पाठो विद्यते॥
कठसंहितायां तु मन्त्राणामेव पाठोऽस्ति॥

(४-३-२- तै॰ संहितायाम्- वस्तुतत्त्वविज्ञानम्-(२)

४ -(२) तै॰ संहितायाः प्रारम्भात्- दर्शपूर्णमासादीनां प्रकृतियज्ञीयेष्टीनाम्। अनुष्ठानादि-
प्रक्रियाज्ञानम्। तथा तदङ्गानां पञ्चप्रयाजानां पञ्चदशसामिधेनीनां, याज्यापुरोऽनु-
वाक्यादीनां स्विष्टकृत्पर्यन्तानां प्रक्रियादिज्ञानम्, सर्वेष्वपि प्रकृतिविकृतियज्ञेषु
अत्यन्तमावश्यकम्, एतेषां अङ्गानामवश्यमनुष्ठेयतया विहितत्वात्।
एवमेव ज्योतिष्टोमादीनां विकृतिक्रतूनामपि- पूर्वाङ्गभूतानां प्रायणीयादीनां आतिथ्येष्ट्या-
दीनां मध्येऽनुष्ठीयमानानां उदयनीयान्तानां हविर्देवतादीनां तदनुष्ठानप्रक्रियाज्ञानम्।
तथा काम्येष्टीनां नक्षत्रेष्टिप्रभृतीनां तत्तत्कामनादिभेदेन हविर्देवतादिभेदेन अनुष्ठीयमानानां
कर्माङ्गानां ज्ञानम्। प्रायश्चित्तादीनां तन्निमित्तादीनां ज्ञानपूर्वकं अनुष्ठानयोग्यानां इष्टीनां
प्रक्रियादिज्ञानम्-तथा सोमादिषु च पशुयागादिषु च वपायागादिमारभ्य अङ्गयागान्तानां
कर्मणां तत्तद्देवतादीनां च ज्ञानम्। मध्यतः प्रवर्ग्यादीनां सवनीयानां च ज्ञानम्
मैत्रायणीयादिसंहितायां एकत्रैव मन्त्रब्राह्मणयोः सत्त्वात् तद्विधानानां ज्ञानसौकर्यम्॥

(५) पञ्चमं पटम्। (चतुर्थी कला ॥ षष्ठं पुटम् ६

(४)

(४-४-१) मूलयजुर्वेदसंहिता ॥ (वाङ्मयी)-(१)

(सन्ति,

५ (१) मूलयजुर्वेदे- बौधायनादीनां काण्डानुक्रमणिका सूत्रानुसारेण पञ्चकाण्डानि,-
(१) प्राजापत्यम्, (२) सौम्यम्, (३) आग्नेयम्, (४) वैश्वदेवम्, (५) स्वायम्भुवम्," इति॥
तेषां ऋषयः "प्रजापतिः, सोमः, अग्निः, विश्वेदेवाः, स्वयम्भूः" इति प्रसिद्धाः
देवतात्मानः, ॥ तेषां काण्डानां प्रारम्भः (१) प्रा. "इषे त्वोर्जे त्वा ॥" (२) सौ. आप उन्दन्तु जीवसे ॥"
(३) आ. उद्धन्यमानमस्या अमेध्यम् "॥ (४) वैश्व. वीहि स्वाहाहुतिं जुषाणः ॥ (५) स्वा. यद्देवा
देव हेडनम्, इति ॥ एतेषु काण्डेषु विषयाः "(१) प्राजापत्यकाण्डे.-" पौरोडाशिकम्,
याजमानः, होतारः, हौत्रम्, पितृमेधः" इति पञ्च विषयाः सन्ति ॥ (२) सौम्ये. "आध्वर्यवम्
ग्रहाः, दाक्षिणानि, समिष्टयजूंषि, अवभृथयजूंषि, वाजपेयः, शुक्रियाणि, सर्वाः"
इति अष्टौ विषयाः ॥ (३) आग्नेये - "अग्न्याधेयम्, अग्निहोत्रम्, अग्न्युपस्थानम्,
अग्निचयनम्, नाचिकेतम्, चातुर्होत्रीयम्, वैश्वसृजम्, आरुणाः, इति, अष्टौ विषयाः ॥
(४) वैश्वदेवे "राजसूयः, पशुबन्धः, इष्टयः, नक्षत्रेष्टयः, दिवश्श्येनयः, अपाद्याः,
साग्रायणम्, उपहोमाः, कौलिकी, सूक्तानि, औपानुवाक्यम्, याज्याः, अश्वमेधः,
पुरुषमेधः, सौत्रामणी, अच्छिद्राणि, पशुहौत्रम्, उपनिषदः" इति अष्टादशविषयाः ॥
(५) स्वायम्भुवे काण्डे. "काठके पठितो विधिः" (यद्देवा देवहेडनम् इत्यारब्धम्"
तेषां काण्डानामध्ययने पञ्च काण्डव्रतानि विहितानि, "काण्डे काण्डे व्रतचर्या" इति. बौधायनसूत्रम्
तथा उपाकर्मादौ काण्डर्षीणां हवनं विहितम्" प्रजापतये काण्डर्षये स्वाहा" इत्यादि पञ्चाहुतयः।
तथैव तेषां तर्पणमपि विहितम्" प्रजापतिं काण्डर्षिं तर्पयामि इत्यादि ॥

(४-४-२) मूलयजुर्वेदसंहितायाम्- (तत्त्वज्ञानम्) २

६ (२) अत्र बौधायनादीनां आचार्याणां अस्मिन् काण्डानुक्रमे यज्ञादितत्त्वानां विषये
शास्त्रीयदृष्टेः विचारानुसन्धानम् ॥ तत्रापि मूलतः ब्राह्मणानुब्राह्मणादिवचनानां
उपव्याख्यानादितत्त्वज्ञानम् ॥ तदनुसारेण काण्डविभाग पाठस्य वैशिष्ट्यम् ॥
तथा मन्त्राणां विभागेऽपि ब्राह्मण वाक्यानुयोग प्रमाणम्,
तत्रापि- आपस्तम्बस्य - हिरण्यकेशयोः" मन्त्रविभागे-सूत्रादिप्रमाणम्,
तेषां मन्त्राणां यज्ञीयविनियोगे विशिष्टो भेदः,
मन्त्रेषु अनुषङ्गादि विषयविचारः, यज्ञीयकर्मानुष्ठाने विनियोगानुसारेण मन्त्रत्व-
सिद्धये- अनुषङ्गेनसहितानामेव मन्त्राणां जपहोमादिषु विहितत्वात् तदध्ययनाध्या
पनादौ पाठ प्रवचनाभ्यां तन्मन्त्रानुसन्धानम् प्रधानम्, तत्रापि पूर्वमीमांसा-
शास्त्रानुसरणम् ॥ ऊहमन्त्राणाममन्त्रत्वेऽपि तत्कालानुष्ठानोपयोगितादि-
कल्पनाविशेषः, इत्यादि

(५) पञ्चमं पटम्।   चतुर्थी कला   सप्तमं पुटम् - ७

(४)

(४-५-३) शुक्लयजुर्वेद संहिता - वाङ्मयी (३)

७ (१) शुक्लयजुर्वेद संहिता - अत्र यजुर्मन्त्राणामेव कण्डिका विभागः, एकस्यां कण्डिकायां बहूनि यजूँषि भवन्ति, यज्ञीयविनियोगार्थं तत्र तत्र - ऋङ्मन्त्राणां ग्रहणम्। केषांचित् ऋक्सूक्तानां पाठः "यथा पुरुषसूक्तम्" तत्रापि मन्त्राणां पाठभेदः अस्ति ~~यथा "सहस्रबाहुः पुरुषः" इत्यादयः आदितः~~ पञ्च मन्त्राः गृहीताः ~~षोडशो मन्त्रः अन्य एव~~ तत्र ३० तमे अध्याये तदेताग्निस्तदादित्य इति उत्तरनारा अन्तिमः ४० अध्यायः "ईशावास्य उपनिषद्रूपः"। पूर्वार्धं शतपथ ब्राह्मणाद् गृहीतम् - अस्यां शाखायां हस्तस्वरेण सह पाठः प्रवर्तते - इदानीमपि प्रचलितो विद्यते। स च स्वराणां सङ्केतरूपः हस्त-मुद्रास्वरूपः, कण्ठोक्तानां वा कुस्वराणां उदात्तानुदात्त स्वरित प्रचयानां बहिः प्रत्यक्ष दर्शनार्थं तन्मुद्राकल्पना "यथा वाणी तथा पाणी" तत्रापि - जात्य - न्युब्जादि स्वराणां मुद्राभेदः।
याज्ञवल्क्य काण्डानुक्रमणिकासूत्रे - प्राजापत्यादि काण्डानां उल्लेखोऽस्ति - तथापि पाठक्रमे - तेषां पूर्वापरीभावो विद्यते, अग्न्याधेयं प्रजापते ऋषिम्" इति, अत्र ऋषिच्छन्दो देवता अपि विद्यन्ते, यजुषां काण्डर्षयः ऋग्वेद मन्त्राणां तत्र स एव ऋषिः अभिमतः "मानो हृकुत्सः, तैत्तिरीयकेऽपि ब्रह्मयानम्" "शौनः शेप आजीगर्तिं वरुणोऽगृह्णात्। स एतां वारुणीमपश्यत्। उदुत्तमं वरुणपाशमस्मदिसाह" इति (तै. ब्रा.   ) "अयं ते सो अग्नि रिति विश्वामित्रस्य सूक्तं भवति" इत्यादि। (तै. ब्रा.)। एवमन्येऽपि बहवो विशेषाः विद्यन्ते ५
(अत्र तिस्रः शाखाः सन्ति - वाजसनेयी, माध्यन्दिनीयः काण्वाश्चेति)

(४-५-२) शुक्लयजुः संहितायां (तत्त्वज्ञानम्) २

८ (२) याज्ञवल्क्यस्य दृष्ट्या अस्मिन् तात्त्विकभाव वैशिष्ट्यम्। यज्ञादिषु मन्त्राणां विनियोगे केषांचिन्मन्त्राणां न्यूनीकरणम्, तथा तत्कर्मणां च निष्कासनम्। तद्यथा "इषे त्वोर्जे त्वा" इत्यस्मात् - अनुवाकादनन्तरं तैत्तिरीयके विद्यमानानां "कर्मणे वां देवेभ्यः शकेयम्" इत्यादीनां वसूनां पवित्रमसि इत्यन्तानां २४ विंशति मन्त्राणां निष्कासनम्। तथा तत्प्रयुक्तानां कर्मणां च न्यूनीकरणम्। तदेतत् शतपथ ब्राह्मणे कात्यायन श्रौतसूत्रेऽपि विहितं दृश्यते॥
एवं सोमयागादिषु बहुधा दृश्यते, केचिद्यागाः इष्टयश्च अत्र न विद्यन्ते, यथा नक्षत्रेष्टयः, सोमयागः पशुयागादिकं च विद्यते, तेषां अनुष्ठाने प्रक्रियाभेदो दृश्यते, मन्त्राणां पाठे तेषां पादादीनां विशेषात्। तत्त्वार्थवैशिष्ट्यं दरीदृश्यते, तद्यथा व्रतग्रहणमन्त्रो "इदमहमनृतात् सत्यमुपैमि" इति। तथा व्रतविसर्जन मन्त्रो - "इदमहं य एवास्मि सोऽस्मि" इत्यादि विशेषः ५

(४)

(४-६-१) सामवेदसंहिता - वाङ्मयी - (१)

९ (१) सामवेदसंहिता - अत्र समग्राः ऋङ्मन्त्राः १८७५ सन्ति, राणायनीयादयः नव शाखाः भवन्ति, तत्र कौथुमीयानां षड् भेदा भवन्ति, सामगाने प्रकृतिगानम् - विकृतिगानम् "इति प्रकार द्वयं विद्यते - तत्र प्रकृतिगाने - [१]गेयत्रम्, [२]आग्नेयम्, [३]ऐन्द्रम्, [४]पावमानम्, [५]गानम्, (गानस्य भेदत्रयम् - अर्कपर्व, द्वन्द्वपर्व, व्रतपर्व "इति) विशिष्टम्) "शुक्रियम्, महानाम्नी" इति सप्त भेदा विद्यन्ते ॥ इति प्रकृतिगानम् ॥ अथ विकृतिगानम् - द्विविधम्, ऊहगानम्, रहस्यगानम् इति ॥

(१) ऊहगानम् - सप्तधा संस्थानम् "(१) दशरात्रम्, (२) संवत्सरम् (३) एकाहम्, (४) अहीनम्, (५) सत्रम्, (६) प्रायश्चित्तम् (७) क्षुद्रमिति "प्रसिद्धम्" ॥

२ रहस्यगानम् - १ विधम्, सदः स्थाने उपविश्य "उद्गाता, प्रस्तोता, प्रतिहर्ताच यद् गायन्ति तद् रहस्यगानम्" इति सम्मतम् ॥ (इति विकृति-गानम्) एकस्यैव मन्त्रस्य - बहुधा गानं विद्यते - २ विधादारभ्य १८ विधपर्यन्तम्)

"तस्मादृच्यध्यूढं साम गीयते" इति छां॰ उपनिषद्वचनम्।

"गीतिषु सामाख्या" इति जै॰ सूत्रम्"

चरणव्यूह परिशिष्ट सूत्रे "सहस्रवर्त्मा सामवेदः" इति वचनात् तस्य सामगानस्य सहस्र मार्गा भवन्तीति प्रतीयते, तत्र केचित्तु सामवेदस्य सहस्र भेदाः भवन्तीति मन्यन्ते, इति तद्विमर्शो हि ॥

(४-६-२) सामसंहिता - तत्त्वज्ञानम् ॥ (२)

१० (२) मन्त्रोक्त देवतारूपस्य वस्तुनः अस्मिन् सामगाने तत्त्व विज्ञानम्"

(१) सेतुगाने - "अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाभिः। यो मा ददाति स इदेव मावा अहमन्नमन्नमदन्तमद्मि" इति साम्नि ऋङ्मन्त्रः अत्र आत्मसाक्षात्कारतत्त्वम् उपदिष्टमस्ति - तद्विज्ञानं अनुसन्धेयम् ॥

२ "अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्। त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम्" इति साम्नो ऋङ् मन्त्रः सोऽयं विश्वामित्रार्षेयः, तस्य आत्मसाक्षात्कारेण ज्ञानोदयेन जन्मना गतिः,

२ इन्द्र क्रतुं न आभर पिता पुत्रेभ्यो यथा। शिक्षाणो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि" इति साम्नो मन्त्रः ऋग्रूपः ॥ संयमादि शिक्षया ज्योतिः पद प्राप्तिः गीयते ॥ एते षां ऽवमादीनां मन्त्राणां ज्ञानेन समता भावेन आत्मस्थितिरेवात्र परमं फलं तत्साम गानस्येति रहस्यम् ॥

(५) पञ्चमं पटम् (चतुर्थी कला ॥) नवमं पुटम् १

(४)

(४-७-१) अथर्ववेदसंहिता- वाङ्मयी (१)

+

११ (१) अथर्ववेदसंहिता - शौनक ~~पिप्पलाद~~ शाखा - "ये त्रिषप्ताः परियन्ति विश्वा रूपाणि-
(१.१.१) बिभ्रतः" इति प्रारम्भः- तदिदं प्रथमं मेधाजननसूक्तम्। चत्वारः मन्त्राः अथर्वा
ऋषिः। वाचस्पतिर्देवता। अनुष्टुप् छन्दः॥ अस्य वेदस्य ऋग्यजुःसामवदिव पृथक्-
स्वरूपं तल्लक्षणं च नास्ति- आंगिरसस्य अथर्वणः ऋषेः मन्त्रदर्शनाधिक्यात् अथर्ववेदः
इति संज्ञया व्यवहारः, अन्येषामपि ऋषीणां मन्त्रदर्शनमस्ति, ऋग्वेदसूक्तानां च,
(ब्रह्मचर्य-सूक्तम्) "मणिसूक्तम्, उच्छिष्ट- स्कम्भ व्रात्य- काल- प्राण- पृथिवी प्रभृतीनां देवतानां सूक्तानि
विद्यन्ते॥ तथा ऋग्वेदस्थानि कानिचित् बहूनि समग्राणि सूक्तानि सन्ति। तत्र दार्घतमसम्,
"अस्य वामीयम् दैर्घतमसार्षेयम्। तथा पुरुषसूक्तं नारायणार्षेयम्- तस्य प्रारम्भः
"सहस्रबाहुः पुरुषः इति, अन्तिमो मन्त्रः "मूर्ध्नो विश्वस्य- इति॥
अत्र काण्डानि (४०) सूक्तानि ( ) मन्त्राः ( ) विद्यन्ते, कैश्चित् ऋग्रूपाः
केचिद् यजुर्मन्त्ररूपाश्च सन्ति॥ एवमेव ब्राह्मणभागोऽपि विद्यते मध्ये तत्र
तत्र पठितः इति विशिष्टम्+।- "विराड् वा इदमग्र आसीत्" अथर्वसं- ८।१०।१)
"यो विद्याद् ब्रह्म प्रत्यक्षम्" अ.सं. ९।६।१) "तस्यौदनस्य बृहस्पतिः शिरः (११।३।१)
"व्रात्य आसीदीयमान एव," (अ. १५।१।१) "जितमस्माकमुद्भिन्नम्" (१६।८।१) इत्यादि
+
(१) पिप्पलादशाखा- प्रारम्भः- "शन्नो देवीरभिष्टये०- इति॥ १।१।१

(४-७-२) अथर्ववेदसंहितायाम्- वस्तुतत्त्वविज्ञानम् (२)

१२- (२) अत्र प्रथमे मेधाजननसूक्ते प्रथमे मन्त्रे "ये त्रिषप्ताः परियन्ति" इति त्रयाणां सप्तकानां
तत्त्वानां योगविज्ञानमुपदिष्टम्। तद्बलस्य प्रापकः वाचस्पतिः सन्दर्शितः मनसः अधिपतिः॥
तथा उत्तरत्र पृथिवीसूक्ते ६३ मन्त्रयुक्ते प्रथमे मन्त्रे पृथिव्याः सन्धारकाः सत्यादयो धर्माः दर्शिताः
"सत्यं बृहदृतमुग्रं दीक्षा तपो यज्ञः पृथिवीं धारयन्ति" इति। (अ.सं.
"मणि- उच्छिष्ट- स्कम्भ- व्रात्यादिसूक्तेषु परं ब्रह्मैव प्रतिपादितम्, सर्वत्रापि ब्रह्मतत्त्वलक्षणसत्त्वात्-
तद्यथा- उच्छिष्टसूक्ते -" ऋचः सामानि सर्वाणि छन्दांसि च यजूंषि च। उच्छिष्टात्-
तस्माद् जायन्ते०- इति वेदानां जनकत्वरूपेण उच्छिष्टं वस्तु उपदिष्टम्, तच्च परं ब्रह्मैव
भवितुमर्हति "उत्-शिष्टम्" सर्वेभ्योऽपि उत्तमं, उत्तमत्वेन शिष्टम् इति तदर्थः।
चतुर्ष्वपि वेदेषु पुरुषात् परस्माद् यज्ञात् वेदानां प्रादुर्भावः संस्मृतः, स एवात्र उच्छिष्टः,
+२ तथैव स्कम्भसूक्तेऽपि विद्यते॥ "यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्॥
(अ. शौनके- १०।७।२०)
स्कम्भं तं ब्रूहि कतमः स्विदेव सः।" इति (सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम्" इति स्पष्टोऽर्थः पूर्वेण समानार्थकः।
इत्यादीनि तत्त्वानि सप्तवस्तुविज्ञाने अनुसन्धेयानि। इति संक्षेपः ५

(४)

(४-७-१) ऋग्वेदब्राह्मणम् - (वाङ्मयम् । (१)

१३ (१) ऋग्वेदस्य ऐतरेयं ब्राह्मणम् - अस्मिन् (८) अष्टौ पञ्चिकाः सन्ति, प्रत्येकस्यां पञ्चिकायां (५-५) अध्यायाः सन्ति - मिलित्वा (४०) अध्यायाः भवन्ति ॥ खण्डाश्च (   ) सन्ति ॥ ऋक्संहितायाः प्रारम्भः "अग्निमीळे पुरोहितम्" इति।
अस्य ब्राह्मणस्य "अग्निर्वै देवानामवमो विष्णुः परमः" इति, एकेनैव ~~विष्णुना~~ अग्निशब्देन ऋक्संहिता ब्राह्मणयोरारम्भः ॥ इदं ब्राह्मणं केवलं गद्यरूपम्, स्वररहितम्, अस्य पाठः एकश्रुतिरूपेण दण्डायमान एव क्रियते, एतेषां छन्दोबन्धनराहित्यात् न मन्त्रत्वम्।
अनेन ब्राह्मशब्देन तत्समानम् - आरण्यकमपि गृह्यते, तत्र ऐतरेयमारण्यकमिति प्रसिद्धो ग्रन्थः, तस्मिन् पञ्च आरण्यकानि सन्ति, "अथ महाव्रतम्। एष पन्था एतत्कर्म, विदो मघवन् विदा, महाव्रतस्य पञ्चविंशतिः सामिधेन्यः। अथैतस्य समाम्नायस्य" इति ॥ एतेषामध्ययने पञ्च व्रतानि विहितानि, महानाम्नीव्रतम्, उपनिषद् व्रतम्,   , शुक्रियम्, गोदानव्रतमिति, अथ पुनः अस्मिन्नारण्यके एव उपनिषद् भागोऽपि अन्तर्गतः, सच "आत्मा वा इदमेक एवाग्र आसीत्" इति प्रारब्धः, दशोपनिषत्सु शाङ्करभाष्यादिसहितः ॥ सच द्वितीयारण्यके तृतीयोऽध्यायः ॥
वस्तुतस्तु उपनिषद् व्रतस्य "एष पन्था एतत्कर्म" इत एव प्रारभ्यते, ब्राह्मयते - "अग्निर्वै देवानामवमो विष्णुः परमः। अथ महाव्रतम्। एषपन्था एतत्कर्म" इति गम्यते। अतएव मध्वाचार्यैः "एष पन्था एतत्कर्म" इत्यत एव प्रारभ्य भाष्यं विरचितम्। तथैव शङ्कराचार्यैरपि रचितं भाष्यमपि विद्यते।

(४-७-२) ऋग्वेदब्राह्मणे - (तत्त्वविज्ञानम् । (२)

१४- (२) ऋग्वेदस्य ऐतरेयब्राह्मणे तत्त्वम् - अत्र १ पञ्चिकायां यज्ञीयदीक्षाव्रतविधानमस्ति, "ऋतं वाव दीक्षा सत्यं दीक्षा, तस्माद्दीक्षितेन सत्यमेव वदितव्यम्" इति ॥ द्वितीय पञ्चिकायाम् - सोमयागे मैत्रावरुणनामकः एकः ऋत्विक् अधिको दर्शितः, सः होतृगणे अन्तर्गतः ॥ ३ पञ्चिकायां अहीनक्रतूनां विधानम् तथा "ऋभुदेवतानां प्रादुर्भावः" तेषां मानवानां देवत्वस्य (रूप-) अमृतत्वस्य प्राप्तिर्दर्शिता। (४) पञ्चिकायां एकाह-अहीन-सत्रादीनां क्रतूनां विधानम् - (५) पञ्चिकायां अन्ते प्रणवाक्षरस्य ओंकारस्योत्पत्तिर्दर्शिता - त्रयीसारभूतस्य। (६) पञ्चिकायां षोडशिक्रतुविधिः - (७) पञ्चिकायां हरिश्चन्द्राख्यानम्, शुनःशेपाख्यानम्, (८) पञ्चिकायाम् - अन्तिमे खण्डे "अथातो ब्रह्मणः परिमरः" इति वायोः परिमरत्वं दर्शितम्, तस्मिन् पञ्चदेवतानां विलयः, ततः तस्मादेव वायोः पुनः तासां उत्पत्तिः ॥ "विद्युद् वृष्टिश्चन्द्रमा आदित्योऽग्निः" ॥ तथा - वायोरग्निर्जायते - इत्यादिः स्ङ्क्षेपः ५

(५) पञ्चमं पटम् (चतुर्थी कला) एकादशम् पुटम् ११

(४)

(ऐतरेयारण्यके तत्त्वज्ञानम्)

(२) तस्य चारण्यकस्य अरण्ये अध्ययनविधानात् अरण्ये अधीयमानत्वात् च तदुपदिष्टानां व्रतादीनां उपासनानां विज्ञानविद्यादीनां च अरण्ये ऐकान्तिके अनुष्ठेयत्वं विहितमिति प्रतीयते॥ अत्र प्रायः मुख्यप्राणोपासनादिकं तथा धीन्द्रिययोगादिकं उपदिष्टं सत् तत्त्वमनुश्रूयते, तथा आचार्यकुले- समावर्तनपर्यन्तं निवासेन अध्ययनेन उपासनादिना तत्प्रक्रियाद्यनुष्ठानेन च सम्पाद्यानि ज्ञानानि ध्येयानि फलानि च अनुदृश्यन्ते॥

(३) एवमेव तत्रैव ब्रह्मोपनिषदि आत्मतत्त्वम्, सदात्मनः सकाशात् तेजोऽबन्नानां सृष्टिः तेषां त्रिवृत्करणम्। तेन च मर्त्यानां जीवात्मनां सशरीरित्वविभागादिकं च उपदिष्टं विद्यते विशिष्टं तत्त्वम्। ततश्च "~~[illegible]~~ कोऽयमात्मेति वयमुपास्महे" इति विचिकित्सया "संज्ञानं विज्ञानं इत्यादीनां षोडशकलानां दर्शनात् प्रज्ञानं ब्रह्मेति दर्शितम्। ततश्च "तदेतद्ब्रह्म ततममपश्यदिदमदर्शमिति" इति तद्ब्रह्मसाक्षात्कारः उपदिष्टम्। तदेतत् समस्तमपि उपनिषद्ज्ञाने अनुसन्धेयम्॥

(४-८-१) तैत्तिरीये कृष्णयजुर्ब्राह्मणम्। वाङ्मयम् (१)

(१)

१५ अस्मिन् तै० ब्राह्मणे त्रीणि अष्टकानि सन्ति। "उद्धन्यमानमस्या अमेध्यम्" इति प्रारब्धम्॥ अत्र मन्त्रब्राह्मणयोः सङ्करेण पाठो विद्यते, सर्वाण्यपि वाक्यरूपाणि सस्वराणि पठ्यन्ते। तथाऽपि अत्रत्यानां मन्त्राणामपि पदपाठादिकं नैव विद्यते। अध्यायसङ्ख्या (   )

(२) तै० आरण्यकेऽपि तत्समानम्। सर्वमपि ब्राह्मणानुसारेण्यैव पठ्यते, अत्र अष्टकानि (   ) अध्यायाश्च (   ) विद्यन्ते।

(३) तै० आ० उपनिषदः- अत्रैव "शिक्षा ब्रह्म- भृगूपनिषदश्च पठिताः। वाक्यरूपाः सस्वराः मन्त्रब्राह्मणसहिताश्च भवन्ति

(४-८-२ तै० ब्राह्मणे - वस्तुविज्ञानम् (२)

(ब्रा० १)

१६ (२) अत्र प्रथमं भूमेः खननेन वेदिनिर्माणादिकं दर्शितम्। ततः अग्न्याधानम् विहितम्। ततः इष्टौ व्रतादिकं दर्शितम्" तस्य तत्त्वं च एवं विधं भवति" "अनृतात् सत्यमुपैमि। मानुषाद् दैव्यमुपैमि। दैवीं वाचं यच्छामि॥ इति- अनेन व्रतेन मनुष्यत्वरूपं अनृतत्वं परित्यज्य सत्यत्वरूपं देवत्वं प्राप्नोमि, तदर्थं ~~[illegible]~~ वाचः मौनरूपं संयमं दर्शयति॥

~~(३) आरण्यकम्~~ - तृतीयाष्टके कृत्तिकानक्षत्रे अग्न्याधानम्। तथा अन्येषां नक्षत्राणां इष्टयः दर्शिताः॥ उत्तरत्र "ऋतं प्रपद्ये सत्यं प्रपद्ये। इत्यादयः होतुः होत्रमन्त्राः दर्शिताः॥

(२) तै० आरण्यके- ब्रह्मयज्ञः, पितृमेधादयः अपरकर्माणि च विहिताः "परेयिवांसं" इति,

(३) तै० उपनिषत्सु- शिक्षादिकम्। "सत्यं ज्ञानमनन्तं ब्रह्म। इति ब्रह्म वस्तुतत्त्वम्। तथा ब्रह्मानन्दस्य मीमांसा। तत्रापि मनुष्यादीनां ब्रह्मणः आनन्दपर्यन्तानां परार्ध्यादादिक्यं परमत्वं च उपदिष्टम्

भृगूपनिषदि- जगत्कारणत्वेन ब्रह्म वस्तूपदेशेन तपसा तद्विमर्शेन आनन्दे ब्रह्मणि सम्पादितम्

मानवीमोति कृतश्च — नौति - तस्य अभयत्वं च

(५८) पञ्चमं पटम्　　(चतुर्थी कला (४)　　द्वादशम् पुटम् ५२

(४-५-१) मूलयजुर्वेदब्राह्मणम् — वाङ्मयम् (१)

३७ (१) इदं ब्राह्मणं मूलयजुर्वेदसंहितायामिवैव प्राजापत्यादिभिः पञ्चभिः काण्डैः
सङ्ग्रथितं विद्यते, तदपि बौधायनादीनां आचार्याणां काण्डानुक्रमणिकासूत्रे दर्शितम्
"सब्राह्मणानि- सानुब्राह्मणानि प्राजापत्यानि" इति। पञ्चानामपि काण्डानां तत्समानम्।
अस्मिन् ब्राह्मणे मन्त्राणां सङ्ग्रहो नास्ति। संहितोक्तानां मन्त्राणां यज्ञादिषु विधाय-
कानि वाक्यानि, सस्वरयुक्तानि भवन्ति॥ प्रश्नादीन्यपि पौरोडाशिकादिनामभिः
संहितानि॥ एतानि यज्ञादीनामनुष्ठाने प्रकरणशः अत्यन्तमुपयुक्तानि॥
अनुब्राह्मणम् इति अत्र वैशिष्ट्यमनुश्रूयते॥ यत्र यज्ञादीनां प्रक्रियादिविधानं
विद्यते तद् ब्राह्मणम्- तद् यथा— "तृतीयस्यामितो दिवि सोम आसीत्" इति
दशानुवाकात्मकः समग्रः प्रश्नः, तथा "प्रसुप्तं रक्षः प्रसुप्ता अरातयः" इति च
एकादशानुवाकात्मकः पूर्णः प्रश्नः॥ अथ यत्र यज्ञे विनियुक्तानां तेषां मन्त्राणां
अर्थविवरणं विद्यते तदेव अनुब्राह्मणमित्युच्यते, तदेतदेवास्य नामानुरूपम्
अभिधानम्" तद्यथा "विश्वरूपो वै त्वाष्ट्रः" इति समग्रः प्रश्नः" अत्र "इषे त्वोर्जे
त्वेत्याह। इषमेवोर्जं यजमाने दधाति। वायवस्थोपायवस्थेत्याह। वायव एवैनान्-
प्रयुनक्ति। देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण इत्याह। यज्ञो हि श्रेष्ठतमं कर्म" इत्यादि
(२) आरण्यकम्- अपि अत्रैव अन्तर्गतम् पितृमेधादिप्रकरणविशिष्टम्
(३) उपनिषदोऽपि- शिक्षा ब्रह्म, भृगूपनिषदः नारायणोपनिषदित्युपनिषदित्यपि प्रसिद्धाः
ताः- वैश्वदेवकाण्डे पठिताः अनुश्रूयन्ते॥ मू. यजुःसंहितायां वै. काण्डे मन्त्रभागाः सन्ति।

(४-५-२) मूलयजुर्वेदब्राह्मणे — तत्त्वज्ञानम् ।(२)

(१) ब्रा.
३८ (२)- अस्मिन् ब्राह्मणे- पौरोडाशिकादीनां पञ्चानामपि काण्डानां विषयानुसारेण-
दर्शपूर्णमासादीनां इष्टीनां तथा सोमादियज्ञानां च तत्त्वम् प्रतिष्ठितम्, तदपि क्वचित
क्रियारूपम्, मन्त्रार्थरूप देवतादिसम्बद्धम्, तत्र कामनाफलादिस्वरूपं च भवति,
\+ नाचिकेत ब्राह्मणम् (का॰ ३।१।८)

(२) आरण्यकम्- अत्र प्रथमं यज्ञादीनां प्रामाण्यम्- "श्रुतिः प्रत्यक्षमैतिह्यम्। अनुमान-
श्चतुष्टयम्" इति चतुर्णां प्रमाणानां निदर्शनम्।
"ब्रह्मयज्ञेन यक्ष्यमाणः- इति स्वयम्भु काण्डे-- ११- प्रकरणे ब्रह्मयज्ञः विहितः"
~~(३) उपनिषदः~~— ~~कठोपनिषदि~~ "उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता
नाम पुत्र आस तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश" इत्यादि (३।१।१।८)
तथैव भृगूपनिषदि- अन्ते निर्भयत्वादिना सामगानादिपरायणत्वम् उपदिष्टम्॥
नारायणोपनिषदि- निरञ्जनोऽमादिकम्। विद्यायज्ञादिकम् उपदिष्टमस्ति सानादितत्त्वपूर्णम्

(४)

(४-३०-१) शुक्लयजुर्वेदस्य शतपथब्राह्मणम् वाङ्मयम् (१)

१९- (१) शुक्लयजुः शतपथब्राह्मणम्- इदं "व्रतमुपैष्यन्" इति प्रारब्धम् (श.ब्रा. १।१।१)
इदं दर्शपूर्णमासेष्टेः विधायकम्। तत्रापि प्रथमतः व्रतग्रहणमन्त्राः तदर्थश्च वर्णितः "
"अग्ने व्रतपते व्रतं चरिष्यामि" दम्पत्योः व्रतार्थं समिदाधानमन्त्राः " "द्वयं वा इदं
न तृतीयमस्ति सत्यं चैव देवाः अनृतं मनुष्याः" इत्यादि। ततः "अथातोऽशनानशनस्य
यदशितमनाशितमिव तदश्यात्" इति तद्विहितम्। ततः दर्शपूर्णमासेष्टेः अनुष्ठानम्। विहितम्-
ततः सोमयागादीनां विकृतियज्ञानां विधिः प्रदर्शितः।
इदं ब्राह्मणं केवलं गद्यात्मकम्। स्वरमपि केवलं अनुदात्तैकस्वरयुक्तम्। प्रायः शुक्लयजुर्वेदिनः
संहिता-पद-क्रम-जटापाठादि-घनपाठान्तं पठन्ति। ब्राह्मणं तु शतशः वेदपाठिषु कश्चिदेव अधीते,
अत्र वाजसनेयी माध्यन्दिनीय-काण्वशाखासु पृथक् शतपथब्राह्मणं विद्यते कञ्चित्पाठभेदविशिष्टम्
यथा संहितामन्त्रेष्वपि पाठभेदो विद्यते- अस्मिन् शाखाद्वये।
(२-३) आरण्यकम्। उपनिषत् इति द्वयमपि एकस्मिन्नेव ब्राह्मणे अन्तर्गतम् यथानुक्रमम्।
एतेन बृहदारण्यकोपनिषत्- इति नाम्ना सङ्गीतम्। भाष्यादिकं च विरचितम् दशोपनिषत्सु।
तत्रापि आद्यं अध्यायद्वयं प्राणोपासनादिविशिष्टम् आरण्यकम्- ततः उत्तरं अध्यायषट्कम्
उपनिषद्विषयकम् इति विवेकः

(४-३०-२) शुक्लयजुः शतपथब्राह्मणे -। तत्त्वज्ञानम् (२)

(१) ब्राह्मण
२० (२) "अनृतात्सत्यमुपैमि" इति यजमानीय व्रतग्रहणमन्त्रे अनृतरूपात् मनुष्यत्वात् सत्यस्वरूपं
देवत्वमुपैमि इति तत्त्वम्। तच्च तैत्तिरीयेण ब्राह्मणवचनेन समानार्थकम् "
"अनृतात् सत्यमुपैमि। मानुषाद्दैव्यमुपैमि" इति।
एवमेव उत्तरत्र सोमयागे "अपश्यं गोपाम्" इति मन्त्रार्थव्याख्याने विशिष्टं तत्त्वम्।
"स सध्रीचीः स विषूचीर्वसानः" इति तृतीयपादस्य उपव्याख्यानम्। " स सध्रीचीश्च
विषूचीश्च दिशो वस्ते ऽथो रश्मीन्" इति- सः परमात्मा एताः समाः विषमाश्च दिशः
परिधत्ते। येन दिग्वसनः दिगम्बरः स्तूयते, अनुश्रूयते च, तथा ज्योती रश्मीन् परिधत्ते-
न केवलाः दिशः, एतेन "ज्योतिर्वसानः पर्यायुरयाः" इति ऋङ्मन्त्रार्थेन सङ्गच्छते।
(२) आरण्यके यत् सप्तान्नानि - त्रीण्यात्मनेऽकुरुतेति मनो वाचं प्राणमिति।
अन्यत्रमना अभूवं नाश्रौषम्। अन्यत्रमना अभूवं नापश्यम्। " स वा अयमात्मा
वाङ्मयः प्राणमयो मनोमयः" इति त्रिकरणयोगस्य तत्त्वमुपदिष्टम्।
(३) उपनिषत्- अध्यात्मतत्त्वम् "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यः" इत्यादि
आत्मदर्शनं उपदिष्टम्। तथा गार्ग्यै अक्षर ब्रह्मतत्त्वम्- "अन्ते "हिरण्मयेन पात्रेण
सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये। पूषन्नेकर्षे यम सूर्य-
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि — योऽसावादित्ये पुरुषः सोऽसावहम् इत्यादि।

(४)

(४-१३-१) सामवेदब्राह्मणम् - वाङ्मयम् (३)

२३ (१) सामवेदब्राह्मणम् - अत्र अष्टौ ब्राह्मणानि सन्ति। (१) ताण्ड्यब्राह्मणम्।
(२) षड्विंशम्। (३) सामविधानम्। (४) आर्षेयम्। (५) देवताध्यायम् (६) उपनिषद्ब्रा०,
(७) छान्दोग्यब्राह्मणम्। (८) वंशब्राह्मणम् ॥ इति ॥
(१) ताण्ड्य ब्रा: (२५) अध्यायाः। सोमयागे- १७८ गायने तद्विधाने प्रवृत्तम् ॥
(२) षड्विंश ब्रा० (५) अध्यायाः। (४८) खण्डाः। (सुब्रह्मण्याह्वानादिसहितानि।)
(३) सामविधान ब्रा० (३) अ० (२५) खण्डाः ॥ (४) आर्षेय ब्रा० (३) अ० (२८) खण्डाः,
(५) देवताध्याय ब्रा० (४) खण्डाः ॥ (६) छान्दोग्य ब्रा० (१०) अ० (छां० उपनिषत् ॥)
(७) संहितोपनिषद् ब्रा० (५५) खण्डाः ॥ (८) वंश ब्राह्मणम् (३) खण्डाः ॥

तान्येतानि सर्वाण्यपि ब्राह्मणानि पृथक्पृथग् विषयकाणि। ज्योतिष्टोमादिषु विकृतियागेषु सामगानादि विधायकानि, केवलानि गद्यरूपाणि, एतेषु ऋङ्मन्त्राणां गायन प्रक्रियादिपद्धतिः प्रदर्शिता ॥ क्वचित् ऋषिच्छन्दो-देवतादयः। क्वचित् कामना भेदाश्च विशिष्टाः समर्थिताः ॥

(८) वंशब्राह्मणस्य सायनभाष्यं विद्यते ॥

(२-३) (उपनिषद्- ब्रा० छांदोग्यब्राह्मणयोः- छान्दोग्योपनिषत्- अन्तर्गता तदाण्यकं च)

(४-१३-२) सामवेदब्राह्मणे - तत्त्वविज्ञानम् (२)

२२ (२) सामवेदब्राह्मणे तत्त्वम् - अत्र "स्वरः, स्वराणां देवताः, तज्ज्ञानेन मन्त्रगानम्" तदेतत्त्रयम्। त्रयाणां समरस्य तत्त्वमेव प्रधानमित्युन्नीयते कर्मकाण्डेऽपि ब्राह्मणे, स्वरे। "प्रस्तावः उद्गीथः, प्रतिहारः, उपद्रवः, निधनम्" इति। (अत्रैव केचित् स्वरसप्तकं मन्यन्ते) प्रस्तावादीनां देवताः अपि विद्यन्ते। तज्ज्ञानं बिना गानं निरर्थकम् अनर्थकं चेति विहितम्। तद्यथा "प्रस्तोतः या देवता प्रस्तावमन्वायत्ता - तां चेदविद्वान् प्रस्तोष्यसि मूर्धा ते अपतिष्यति" इति। (बृ० उ०) याज्ञवल्क्येन प्रस्तोतारं प्रति उक्तं वचनम्। तथैव उद्गातृप्रभृतीनामपि आदेशो विद्यते ॥ तद्वदेव सवनीयस्वराणां ज्ञानमपि आवश्यकम्। प्रातः मध्यन्दिने सायंसवने च स्वरभेदेन मन्द्र मध्य तार स्वरैः गानं विहितम्। यज्ञादौ तज्ज्ञानमपि अनुश्रूयते ॥

(२) छान्दोग्योपनिषदि मुख्यप्राणोपासनादिकं, सदात्मनः सकाशात् तेजोऽबन्नानां सृष्टिः तेषां त्रिवृत्करणम्। संवर्गविद्या मधुविद्या, पञ्चाग्निविद्यादीनामुपदेशः विहितः, गायत्र्यादिच्छन्दसां योगेन पुरुषस्य तत्त्वम् तेन च तद्दर्शनश्रवणादिरूपमुपासनं च विहितम् विद्यते। "तदेतद्दृष्टं च श्रुतं चेत्युपासीत" इत्यादि "तत्त्वमसीति" महावाक्य तत्त्वोपदेशश्चास्ति ॥

(४)

(४-१२-१) अथर्ववेद ब्राह्मणम् - । वाङ्मयम् (१)

२३ (१) अथर्ववेद ब्राह्मणम् – अस्य ब्राह्मणस्य वेदविहितेषु प्रकृति-विकृतियज्ञादिषु नैवास्ति कश्चित् सम्बन्धः ऋग्वेदादि वेदत्रयेणैव तद्यज्ञादिसम्पत्तेः दर्शनात् इति। तात्त्विकार्थप्रतिपादकं तु दृश्यते। तद्यथा "विराड्वा इदमग्र आसीत्" (अ. ८-१०।१) "यो विद्याद् ब्रह्म प्रत्यक्षम्" (अ. १०।६।१) "तस्यौदनस्य बृहस्पतिः शिरः" (अ. ११।३।१) इत्यादीनि बहूनि ब्राह्मणोपदिष्टानि श्रूयन्ते। तथैव केषांचिदोषधिवनस्पत्यादीनां चिकित्सादिप्रयोगविधिर्विद्यते। तथा केषांचिदाभिचारिकाणां कर्मणां विधानमपि दरीदृश्यते तत्तत्कामनाभेदेन शत्रुनिवारणादिकम्।

(२-३) कानिचिदुपनिषद्वाङ्मयानि विद्यन्ते। केनोपनिषत् (तवल्कारोपनिषत्) प्रश्नो० मुण्डकोपनिषत्। माण्डूक्योपनिषत्। तथा गणपत्यथर्वशीर्षोपनिषद् इत्यादि। केनोपनिषत्प्रभृतीनि चत्वारि वाङ्मयानि दशोपनिषत्सु प्रसिद्धानि। तेषु कानिचिद् गद्यरूपाणि कानिचित् पद्यरूपाणि स्वररहितान्येव पठ्यन्ते तेषां भाष्याणि श्रीशङ्कराचार्यादिभिः प्रणीतानि प्रसिद्धानि। माण्डूक्योपनिषदः गौडपादाचार्यप्रणीता कारिकाऽपि विद्यते इति विशेषः। तदेतत्तु केवलं प्रणवाक्षरतत्त्वप्रतिपादकः, ज्ञानविज्ञानार्हः एव,

(४-१२-२) अथर्ववेदब्राह्मणे- । तत्त्वविज्ञानम् (२)

२४ (२) अथर्ववेदब्राह्मणे तत्त्वविज्ञानम् - अत्र वाङ्मये दर्शितेषु "विराड्वा" इत्यादिषु
(१) विराट् पुरुषतत्त्वम्। (२) प्रत्यक्षब्रह्म तत्त्वम्। (३) ब्रह्मौदनस्य बृहस्पतिशिरस्त्वम्। इत्यादि।

(२-३) उपनिषदां तत्त्वम् – (१) केनोपनिषदि- प्रस्तुतम् "किमेतद् यक्षमिति" देवानां प्रश्नवचनम् "अथेन्द्रमब्रुवन् किमेतद्यक्षमिति स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्यक्षमिति सा ब्रह्मेति होवाच" इति तस्याः उमायाः मुखाद् ब्रह्मोपदेशः कृतः, ततः- उत्तरत्र "केनेषितं पतति प्रेषितं मनः," "प्राणस्य प्राणम्" यद्वाचाऽनभ्युदितम्" एवञ्च त्रिभिः श्लोकैः वाङ् मनः प्राण चक्षुः श्रोत्रादीनां प्रवृत्ति-निवृत्ति-निष्ठा-प्रतिष्ठारूपाणि साधनानि ध्येयानि प्राप्तव्यानि फलानि च प्रदर्शितानि॥

(२) प्रश्नोपनिषदि पिप्पलादस्य ऋषेः सकाशात् षण्णां मुनीनां लब्धः कृतः सात्मवस्तुतत्त्वोपदेशः
३ मुण्डकोपनिषदि- पराऽपराविद्यानां उपदेशः कृतः। यामधिकृत्यैव एषा वेदशाखा लिख्यते। यया तदक्षरमधिगम्यते इति च परा विद्याया सर्वविद्याप्रतिष्ठायाः ब्रह्मविद्यायाः तत्त्वम्। इदम्।
४ माण्डूक्योपनिषदि वाच्यवाचकयोः वाग्वस्तुनोः प्रणवाक्षरतदर्थयोः समात्रामात्र तत्त्वम् अपि
५ गणपति उपनिषदि गणपतेः वाङ्मयत्वं चिन्मयत्वं, वाक्पदञ्च तुर्यरूपत्वञ्च समर्थितम्। इति शम्

(४-३३-१) वेदोपनिषत् । वाङ्मयम् (३)

२५ (१) वेदोपनिषत् — चतुर्ष्वपि वेदेषु प्रसिद्धा वाङ्मय्यः उपनिषद इव "वेदोपनिषत्" इति संज्ञया प्रसिद्धा काचिदुपनिषद् विद्यते, तथाऽपि "एषा वेदोपनिषत्" इति (तै. शिक्षोपनिषदि प्रसिद्धं ब्राह्मण वचनं विद्यते, तदिदं साङ्केतिकं लक्षणप्रयुक्तं नामधेयम्. तत्र "वेदः - मन्त्राः ज्ञानरूपः ज्ञानप्रापकश्च भवितुमर्हति" "उपनिषत्" इति अध्यात्मतत्त्वप्रधानं ब्राह्मणम्. अनयोः शब्दयोर्योगेन मन्त्रब्राह्मणात्मिका "वेदोपनिषत्" इति तस्य वाङ्मयस्य अर्थः, तथैव विद् ज्ञाने मन् अवबोधने इति धात्वर्थयोर्योगात् ज्ञान-विज्ञान स्वरूपा वेदोपनिषदिति गम्यते ॥ (वेदश्च असौ उपनिषच्च वेदोपनिषदिति कर्मधारयार्थः
(१) ईशावास्योपनिषत्" इति अस्यामुपनिषदि शुक्लयजुः संहितायाः अन्तिमः चत्वारिंशः (४०) अध्यायः तस्मिन् पूर्वार्धः संहितान्तर्गत एव, उत्तरार्धस्तु बृहदारण्यकोपनिषदः सङ्गृहीतः, तेनेदं अनुरूपनामधेयम् "वेदोपनिषत्" इति,
(२) सामवेदे तु - षड्विंशं ब्राह्मणं "उपनिषद् ब्राह्मणम् - तच्च संहितोपनिषद् ब्राह्मणम्। अथवा मन्त्र ब्राह्मणम्" इति प्रसिद्धम् विद्यते, एतेन वेदोपनिषत् इत्यस्मिन् एकस्मिन्नेव शब्दे "वेदः, उपनिषत्", संहिता, मन्त्रः ब्राह्मणम्" इति चत्वारः सदर्थबोधकाः शब्दाः तथा तदर्थरूपाणि चत्वारि लक्षणान्यपि सङ्गतानीति प्रतीयते ॥
एवमेव "वेदे - वेदमन्त्रे विद्यमाना उपनिषत्" वेदोपनिषत् इत्यर्थः सम्पद्यते, तद्यथा दीर्घतमसः दर्शने अस्यवामीयसूक्ते - "अस्य द्विपञ्चाशदृचस्त्वं वैतत संशयोत्थापन प्रश्न-प्रतिवाक्यान्यत्र प्रायेण ज्ञान मोक्षाक्षर प्रशंसा च संवत्सरसंस्थं कालचक्रवर्णनम्. इति सर्वानुक्रमसूत्रे स्पष्टं अभिहितम्. तथा अथर्ववेदे - उच्छिष्ट-स्कम्भ, मणि व्रात्यादीनि (सूक्तानि भवन्ति ५

(४-३३-२) वेदोपनिषत् - तत्त्वविज्ञानम् (२)

२६ (२) वेदोपनिषत् - अस्याः तत्त्वज्ञानेऽपि इयमेव विशेषताऽस्ति, एतन्नामकं किञ्चित तत्त्वान्तरं नाम नास्त्येव, एतस्यैवार्थस्य सङ्केतेनैव तत्त्वरहस्यग्रहणं कर्तव्यं भवेत् तत्त्वज्ञानविषये अयं "वेदोपनिषदिति" शब्दः अत्यन्तं रहस्यार्थबोधको भवति, "विद् ज्ञाने", मन् अवबोधने " मन्त्राः मननात्" इत्येषां धातूनां अर्थात् अनुभव रूपं मननरूपं च तदध्यात्मतत्त्वमेवात्र "वेदोपनिषत्" इति नाम्ना स्वीक्रियते, तदेतत् वेद-मन्त्रेष्वेव ओतं प्रोतं च परिपूर्णमस्ति, यथा दीर्घतमसः ऋषेः अस्यवामीयसूक्ते, तथैव अथर्ववेदेऽपि "मणिसूक्ते तथा - उच्छिष्ट - स्कम्भ - व्रात्यादिषु सूक्तेषु च तदेतदेवात्तत्त्वं वेदोपनिषद्रहस्यार्थकं तत्र तत्र वेदमन्त्रेषु ब्राह्मणोपनिषदादिषु च, गुप्तमेवास्ति, विदुषां संशोधनेन तेषां तत्त्वं स्फुटी भवितुमर्हति। तच्च याथार्थ्येन प्रकाशयितुं समर्थेत, इत्यादि रहस्यम् विज्ञेयम्

(४) (वेदानां षडङ्गानि)

(४-१४-१) वेदाङ्ग शिक्षा - वाङ्मयी (३)

(१) प्रथमं वेदाङ्गम्

२७ (१) वेदाङ्ग शिक्षा - इयं, ~~"वृद्धिरादैच्" इति सूत्रेण प्रारब्धा, पाणिनिना मुनिना विरचिता, अष्टाध्यायी~~, "अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा" इति प्रारब्धा। पाणिनिना मुनिना प्रणीता, अध्यायाः ( ) श्लोकाः ( ) सन्ति,

"अइउण्। ऋऌक्। एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्।" इति तेषां चतुर्दश सूत्राणां मुखेन इदम् अक्षरसमाम्नाय सञ्ज्ञकं शब्दशास्त्रमूलबीजं जज्ञे, सूत्राणां च तेषां संशोधनेन पाणिनिना ६४ वर्णाः प्रादुष्कृताः, ये तु वेदानां संस्कृतानां तथा प्राकृतानां सर्वेषामपि भाषाविशेषाणां वाङ्मयानां च मूलभूताः वर्णाः॥ तेषां सञ्ज्ञाः परिसङ्ख्या च "स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च ᳵक ᳶपौ चापि पराश्रितौ। दुस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च॥" इति॥ वे. शिक्षा (श्लो.)

"अ इ उ ऋ" इति (४) ह्रस्वदीर्घप्लुतैः सह - (४×३) १२ वर्णाः, ऌकारं प्लुतरहितं १ - (१३) ए ओ ऐ औ इति ४ - ह्रस्वाभावात् (८) वर्णाः - मिलित्वा अष्टौ स्वराः, कादयो मावसानाः २५ वर्णाः यादयः (८) (४) यमवर्णाः, कखगघ इत्येषां द्वित्वे (४) अनुस्वारः (ं) विसर्गः (ः) (२) ᳵक ᳶपौ (२) दुस्पृष्टः (ळकार) ऌ (१) - एवं ६४ वर्णाः॥ ऌकारस्य पृथग् वर्णगणने (६३) वर्णाः।

इदं शिक्षारूपं शास्त्रम् वेदस्य घ्राणेन्द्रियं मतम् "शिक्षा घ्राणं तु वेदस्य"

(४-१४-२) वेदाङ्गशिक्षायाम् - तत्त्वज्ञानम् (३)

२८ (२) वेदाङ्ग शिक्षा - मूलतः इयं शिक्षा तैत्तिरीयोपनिषदि विद्यते - "शीक्षां व्याख्यास्यामः। वर्णः स्वरः, मात्रा, बलम्, साम, सन्तानः, इत्युक्तः शीक्षाध्यायः॥" वर्णः अकारादिः। स्वरः ह्रस्वदीर्घप्लुताः। मात्रा। तेषां एकद्वित्रिमात्राः। बलम् - अन्तर्बाह्यप्रयत्नाः, साम - सान्धारणम् - मुखीन उपास्यः सुध्युपास्यः। सन्तानः अनेकेषां अक्षराणां योगः पदादिसम्पत्तिः। "वाणी।[2] अक्षरम्।[3] समाधानम्[4]" अक्षराणां वाचा उच्चारणे विधेः शिक्षा "द्विरोष्ठौ तु विगृह्णीयाद् यत्रौकारवकारयोः॥" ओकारवकारयोः उच्चारे द्वयोः ओष्ठयोः वर्तुलाकारेण योजनम्। तथा वकारस्य दन्तोष्ठम्" वकारोच्चारे तु दन्तोष्ठयोः संयोगोऽपि आवश्यकः।

एवं ह्रस्वदीर्घप्लुतस्वराणामुच्चारे - एकद्वित्रिमात्रायोगः - "ऊकालोज् ह्रस्वदीर्घप्लुतः" इति आकरणे उक्तौ - तस्य शिक्षा अन्येषामुच्चार स्वरश्रवणादेव यथायोग्यं भवेत्।

तथा ~~स्वरः~~ प्रातः सवनादि स्वराणाम् उच्चारः, "प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन। मध्यन्दिने कण्ठगतेन चैव चक्राह्वसङ्कूजितसन्निभेन। तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्" इत्यादि तत्तल्लक्षणं तत्तत्पशुपक्षिणां स्वरानुश्रवणेनोच्चारणीयम्॥

(५) पञ्चमं पटलम् ।   (॥ चतुर्थी कला ॥)   अष्टादशं पुटम् १८

(४)

(४-१५-१) कल्पः द्वितीयं वेदाङ्गम् वाङ्मयम् (१)

(२) अङ्गम्   (पृथक्पृथक्)

१९ (१) कल्पः - सर्वेष्वपि वेदेषु सर्वास्वपि शाखासु प्रत्येकशः कल्पसूत्राणि विद्यन्ते, तत्रापि श्रौतकल्पः स्मार्तकल्पः इति द्वेधा भेदोऽस्ति, यत्र वैदिकयज्ञादीनां कल्पना अस्ति सः श्रौतकल्पः, यत्र उपनयनादीनां संस्काराणां कल्पना अस्ति स स्मार्तकल्पः, स च गृह्यकल्प इत्यपि अवह्रियते, तस्य गृह्यसूत्रमिति ग्रन्थोऽस्ति,

+ (१) ऋग्वेदे तावत् आश्वलायन श्रौतसूत्रम्, आश्व. गृह्यसूत्रम् आ. गृ. परिशिष्टम् च

+ (२) तै. यजुर्वेदे - बौधायनं - आपस्तम्बं - हिरण्यकेशीयं इति शाखात्रये - पृथक् सूत्राणि सन्ति - श्रौतसूत्रम् गृह्यसूत्रम् धर्मसूत्रं चेति, तेषु हिरण्यकेशीयं तु सत्याषाढश्रौतसूत्रम् सह । गृह्यसूत्रं च विद्यते ॥

+ (३) शुक्लयजुर्वेदे । कात्यायन श्रौतसूत्रम् । कात्यायन गृह्यसूत्रं च विद्यते

+ (४) सामवेदे तु दश सूत्राणि सन्ति । (१) द्राह्यायणश्रौतसूत्रम्, (२) अनुपदसूत्रम् । (३) निदानसूत्रम् । (४) कल्पसूत्रम् । (५) उपग्रन्थसूत्रम् (६) क्षुद्रसूत्रम् । (७) दन्ता-लक्षणम् । (अथवा ताण्ड्यलक्षणम्) (८) पञ्चविध सूत्रम् । (९) कल्पानुपदम् । (१०) अनुस्तोत्रम् "इत्यादि" एतेषां ग्रन्थानां - अध्याय-खण्ड-सूत्रादि सङ्ख्या तु उत्तरत्र उपाख्यानावसरे प्रकाशयिष्यते ॥

+ अथर्ववेदे । श्रौतकल्पसूत्रं नास्ति, वैदिकयज्ञेषु तेषां सम्बन्धाभावात् । तथापि गृह्यसूत्रमस्ति । सोऽयं कल्पः वेदस्य हस्तः " हस्तौ कल्पोऽथ पठ्यते" इति (शिक्षा)

(४-१५-२) कल्पेषु - तत्त्वज्ञानम् - (२)

२० - (२) - "कल्पते" इति कल्पः, यज्ञादि कल्पनायां तत्फलप्रदाने च सामर्थ्यात् । "कल्प्यते" तत्कल्पना क्रियते इति तद्व्युत्पत्तेः । "कल्पयति" स्वयं कल्पनां करोति, एवं प्रत्यक्ष प्रक्रियया प्रतिपादित कर्मादिकं परिशीलयति, इति तदर्थः, तथा अन्यैः अपि तत् कर्म कारयतीति, इत्यादिकं सर्वमपि कल्पस्य मुख्यं तत्त्वम् ॥
तत्रापि श्रौतकल्पे सप्त पाकसंस्थाः सप्त हविः संस्थाः सप्त सोमसंस्थाः इति त्रिधा भेदाः विद्यन्ते, विकृतियज्ञेषु - अग्निष्टोमः, अप्तोर्यामः, वाजपेयादयः प्रसिद्धाः,
क्षत्रियाणां तु राजसूयः अश्वमेधप्रभृतयः ।
एतेषु यज्ञेषु सोमकल्पः पशुकल्पः इति द्विधा भेदः, तयोः एकैकमेव स्वतन्त्रतया पृथक्पृथक् कर्तुं कल्पं कर्तुं इच्छन्ति, केचित् साद्यस्केन उभयमपि एकत्रैव एकस्मिन्नेव काले कुर्वन्ति - तेषां यज्ञानां देवतादयोऽपि पृथगेव भवन्ति ॥

(५) पञ्चमं पत्रम् (चतुर्थी कला) एकोनविंशं पुष्पम् ३१

(४)

(४-१६-१) व्याकरणं तृतीयं वेदाङ्गम्॥ वाङ्मयम् (३)

(३) वेदाङ्गम् अध्याया. ८ सूत्र सं. ( )

३१ (१) व्याकरणम् — इदं अष्टाध्यायी सूत्रमिति प्रसिद्धम्॥ "वृद्धिरादैच्" इति
सूत्रेण प्रारब्धम्, मूलतः "अइउण् ऋऌक्, एओङ्" इत्यादिभ्यः चतुर्दशसूत्रेभ्यः प्रणीतम्।
तत्र शास्त्रीय प्रक्रिया सिद्धये अनेके प्रत्याहाराः परिकल्पिताः। अण्, इण्, अच्, अट्,
अम्, यण्, खय्, भय्, झल्, शल्, अश्, झश्, हल् प्रभृतयः प्रत्याहाराः।
अस्य - वररुचि ~~कात्यायन~~ विरचिता वृत्तिः, पतञ्जलि प्रणीतं महाभाष्यं च विद्यते,
तच्च भाष्यम् सूत्रानुक्रमेण रचितमस्ति, एवमेव भट्टोजीदीक्षितेन रचिता - वैयाकरण-
सिद्धान्त कौमुदी विद्यते, तत्र ~~अ~~ संज्ञा प्रकरणम् - अजन्तपुल्लिङ्गम् ~~अजन्तपुल्लिङ्ग~~-
अजन्त स्त्रीलिङ्गम्, अजन्तनपुंसकलिङ्गम्, हलन्तानि पुल्लिङ्ग स्त्रीलिङ्ग-
नपुंसकलिङ्गानि, स्त्रीप्रत्ययः, कारकम् - तद्धितप्रत्ययाः, धातुप्रक्रिया, ~~य~~ यङ्लुङन्ताः,
स्वरवैदिकी प्रक्रिया इत्यादीनि बहूनि प्रकरणानि विद्यन्ते,
धातुप्रक्रियायाम् भूत ~~व~~ वर्तमान भविष्यकाल सम्बन्धात् दशलकाराः क्लृप्ताः,
"लट्, ~~अ~~ लङ्, लिङ्, लोट्, लुङ्, प्रभृतयः दशलकाराः,
धातवोऽपि - भ्वादि अदादि प्रभृतयः दशधा गणाः विद्यन्ते, तत्रापि प्रेरणार्थके
णिच् - इत्यपि पृथक् अस्ति,
अत्र व्याकरणे शब्दशुद्धिरिव लिपिशुद्धिरपि आवश्यकी, अन्यथा केवलेन
उच्चारणेन तत्स्वरूपज्ञानं भवितुं नार्हति॥
इदं व्याकरणं वेदस्य मुखम् - "मुखं व्याकरणं स्मृतम्" (पा. शि)

(४-१६-२) व्याकरणे - तत्त्वज्ञानम्॥ (१)

(३) अङ्गम् -

३२ (२) व्याकरणम् — वाच्यः तथा वाच्यार्थस्य च वस्तुनः सम्बन्धे ~~न~~ यथार्थज्ञानमेव
व्याकरणस्य मूलं तत्त्वम्। तदेव मुख्यं उद्देशं च भवति, बिना धात्वर्थेन वयमेव,
पदार्थज्ञानं न सम्भवति, तथा केवलं प्रातिपदिकस्य (बहोन) नाम्नः स्वरूपमपि ज्ञातुमशक्यम्
तत्रापि स्त्री पुं नपुंसकानि त्रीणि लिङ्गानि एक द्वि त्रीणि वचनानि च भवन्ति,
तथा सप्त विभक्तयः कारकापरपर्यायाः (सम्बोधनं च) इति प्रसिद्धमेव,
एतेषां सर्वेषामपि प्रत्यया भवन्ति तत्प्रत्ययमन्तरेण केवलं प्रकृतिमात्रेण शब्दज्ञानं
न भवति - ~~स~~ कस्मिन्नर्थे एता विभक्तयः सन्तीत्यपि ज्ञातव्यमेव, एतेनामपदम्
अव्ययं - उपसर्गादयोऽपि ज्ञेयाः, "यन्न व्येति तदव्ययम्" इति च तल्लक्षणम् केषु केषु
अर्थेषु भवतीति "अव्ययं विभक्तिसमीप० - साकल्यान्त वचनेषु" (इति. पा. सू)
वाच्यः नामाख्याते चोपसर्गनिपाताः इति च चत्वारि वाच्यः पदानि भवन्ति॥
एवं आख्यातानामपि स्वरूपज्ञानमावश्यकम्, प्रथम मध्यम ~~उ~~ उत्तमाः त्रयः पुरुषाः।
तत्रापि एक द्वि बहुवचनानि भवन्ति, इत्यादि तत्त्वज्ञानम् व्याकरणस्य मूलम् अन्तःसं च